# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (०८)

## १२.११.२०१२

# ४७०. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्-ठक्ठञ्कञ्क्वरपः (४.१.१५)

- एकपदात्मकं सूत्रम् । टित्-ढ-अण्-अञ्-द्वयसच्-दघ्नच्-मात्रच्-तयप्-ठक्-ठञ्-कञ्-क्वरपः ।
- ‘ङ्याप्प्रातिपदिकात्’ (४.१.१) इति, ‘स्त्रियाम्’ (४.१.३) इति, ‘अनुपसर्जनात्’ (४.१.१४) इति च अधिक्रियन्ते । ‘अजाद्यतष्टाप्’ (४.१.४) इत्यतः ‘अतः’ इति, ‘ऋन्नेभ्यो ङीप्’ (४.१.५) इत्यतः ‘ङीप्’ इति च अनुवर्तते ।
- अनुपसर्जनं यत् टिदादि, तदन्तं यद् अदन्तं प्रातिपदिकं, ततः स्त्रियां ङीप् स्यात् ।
- टिड्ढाणञ् इति ।

- कुरुचरी ।
- कुरुचरीति ।

- नदट् - नदी ।
- नदडिति ।

- उपसर्जनत्वात् नेह ।
- बहुकुरुचरा ।
- बहुकुरुचरेति ।

- वक्ष्यमाणा इत्यत्र टित्त्वाद् उगित्त्वाच्च ङीप्प्राप्तः ।

- यासुटो ङित्त्वेन ‘लाश्रयमनुबन्धकार्यं नादेशानाम्’ (प) इति ज्ञापनात् न भवति ।